# ROLL DESCRIPTIONS

ROLL NO - 0010201

DATE OF FILMING 19 5 90

NAME OF THE CENTRE/COLLECTION SARASWATI BHAWAN LIBRARY, VARANASI

DETAILS OF CATALOGUE(SUB/VOL.) VEDA

LANGUAGE - SANSKRIT

SCRIPT - DEVANĀGARI

TOTAL FRAMES - 599

FOOTAGE -

ORIGINAL FILM USED - KODAK

BASE - PAPER

## RETAKES INFORMATION

| MSS NO. | FOLIO NO. | REMARKS |
|---|---|---|
| 001669 | Full mss | Spliced at the end of roll. |
| 001672 | Full mss | Spliced at the end of roll. |

Indira Gandhi National Centre for the Arts

प्रवेश सं० ——————

विषय: ——————

क्रम सं० ——————

नाम ——————

ग्रन्थकार ——————

पत्र सं० ——————

श्लोक सं० ——————

अक्षर सं० (पंक्तौ) ——————

पंक्ति सं० (पृष्ठे) ——————

आकार: ——————

लिपि: ——————

आधार: ——————

वि० विवरण ——————

001666

पी० एस० यू० पी०—९७ एम० सी० ई०—१६४१—४० ०००

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts

गृ॰ सू॰ श्रीगणेशायनमः॥ हरिः ॐ ॥ उक्तानिवैतानिकानिगृह्याणिवक्ष्यामस्त्रयःपाकयज्ञाहु
१ ताअग्नौहूयमानाअनग्नौप्रहुताब्राह्मणभोजनेब्रह्मणिहुताअथाप्यत्रोदाहरंतियः
समिधायआहुतीयोवेदेनेतिसमिधमेवापिश्रद्दधानआदधन्मन्येतयजइदमितिन
मस्तस्मैयआहुत्यायोवेदेनेतिविद्ययैवाप्यस्तिप्रीतिस्तदेतत्पश्यन्नृषिरुवाच
अगोरुधायगविषेद्युक्षायदस्म्यंवचः घृतात्स्वादीयोमधुनश्चवोचतेतिवचएवमि
दंघृताच्चमधुनश्चस्वादीयोस्तिप्रीतिःस्वादीयोस्त्वित्येवतदाह आतेअग्नऋचाहवि राम्
र्हृदातष्टंभरामसि तेतेभवंतूक्षणऋषभासोवशाउतेत्येतएवमउक्षाणश्चऋषभा १

श्चवशाश्चभवंतियइमंस्वाध्यायमधीयतइतियोनमसास्वध्वरइतिनमस्कारेणवै
खल्वपिनवैदेवानमस्कारमतियज्ञोवैनमइतिहिब्राह्मणंभवति १ अथसायंप्रा
तःसिद्धस्यहविष्यस्यजुहुयादग्निहोत्रदेवताभ्यःसोमायवनस्पतयेग्नीषोमाभ्या
मिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेत्यथ
बलिहरणमेताभ्यश्चैवदेवताभ्योद्भ्यओषधिवनस्पतिभ्योगृहायगृहदेवताभ्यो
वास्तुदेवताभ्यइंद्रायेंद्रपुरुषेभ्योयमाययमपुरुषेभ्योवरुणायवरुणपुरुषे
भ्यःसोमायसोमपुरुषेभ्यइतिप्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइतिमध्येविश्वेभ्योदे

Indira Gandhi National Centre for the Arts

वेभ्यः सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा नक्तंचारिभ्य इति नक्तं रक्षोभ्य इत्युत्त
रतः स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिणा निनयेत् ॥२॥ अथ खलु यत्र क्वच
होष्यन्स्यादिषुमात्रावरं सर्वतः स्थंडिलमुपलिप्योल्लिख्य षड्लेखा उदगायतां प
श्चात्प्रागायते नानान्तयोस्तिस्रो मध्ये तदभ्युक्ष्याग्निं प्रतिष्ठाप्यान्वाधाय परि
समुह्य परिस्तीर्य पुरस्ताद्दक्षिणतः पश्चादुत्तरत इत्युदक्संस्थं तूष्णीं पर्युक्ष
णं पवित्राभ्यामाज्यस्योत्पवनमप्रच्छिन्नाग्रावनंतर्गर्भौ प्रादेशमात्रौ कुशौ ना राम
नान्तयोर्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां सवितुष्ट्वा प्रसव २

उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति प्रागुत्पुनाति सकृन्मन्त्रेण द्विस्तू
ष्णीं कृताकृतमाज्यहोमेषु परिस्तरणं तथाज्यभागौ पाकयज्ञेषु ब्रह्मा च । धन्वंतरि
यज्ञशूलगववर्जमग्नये स्वाहेति जुहुयादग्निरिंद्रः प्रजापतिर्विश्वे देवा ब्रह्मेत्य
नादेश एकबर्हिरिध्माज्यस्विष्टकृतस्युस्तुल्यकालास्तदेषाभियज्ञगाथा
गीयते पाकयज्ञान्समासाद्यैकाज्यानेकबर्हिषः एकः स्विष्टकृतः कुर्यान्नाना
पि सति दैवत इति ॥३॥ उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोप
नयनगोदानविवाहाः सार्वकालमेके विवाहं तेषां पुरस्ताच्चतस्र आज्याहुतीर्जु

Indira Gandhi National
Centre for the Arts

गृ॰सू॰ जुहुयादग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च व्याहृतिभिर्वा समुच्च
३ यमेके नैके कांचन त्वमर्यमा भवसि यत्कनीनामिति विवाहे चतुर्थीं ४ कुलमग्रे परीक्षे
त ये मातृतः पितृतश्चेति यथोक्तं पुरस्ताद्बुद्धिमते कन्यां प्रयच्छेद्बुद्धिरूपशीललक्ष
णसंपन्नामरोगामुपयच्छेत दुर्विज्ञेयानि लक्षणानीत्यष्टौ पिंडान्कृत्वा ऋतमग्रे प्र
थमं जज्ञ ऋते सत्यं प्रतिष्ठितं यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्स
त्यं तद्दृश्यतामिति पिंडानभिमंत्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति क्षेत्राच्चेदुभयतः रामः
सस्याद्गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विद्याद्गोष्ठात्पशुमती वेदिपरी ३

षाद्ब्रह्मवर्चस्विन्यविदासिनो ह्रदात्सर्वसंपन्ना देवनात्कितवी चतुष्पथाद्द्विप्र
व्राजिनी रिणादधन्या श्मशानात्पतिघ्नी ५ अलंकृत्य कन्यामुदकपू
र्वां दद्यादेष ब्राह्मो विवाहस्तस्यां जातो द्वादशावरान्द्वादश परान्पुनात्युभय
त ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवो दशावरान्दश परान्पुनात्युभ
यतः सह धर्मं चरत इति प्राजापत्योऽष्टावरानष्ट परान्पुनात्युभयतो गोमिथु
नं दत्त्वोपयच्छेत स आर्षः सप्तावरान्सप्त परान्पुनात्युभयतो मिथः समयं कृ
त्वोपयच्छेत स गांधर्वो धनेनोपतोष्योपयच्छेत स आसुरः सुप्तानां प्रमत्तानां

Indira Gandhi National
Centre for the Arts

गृ॰ सू॰ ४ वापहत्सपैशाचोहत्वाभिलावशीर्षाणिरुदतीं॰रुदद्भ्योहरेत्सराक्षसः ६ अथ
खलूच्चावचाजनपदधर्माग्रामधर्माश्चतान्विवाहेप्रतीयाद्यत्तुसमानंतद्व
क्ष्यामः पश्चादग्नेर्दृषदमश्मानंप्रतिष्ठाप्योत्तरपुरस्तादुदकुंभंसमन्वा
रब्धायांहुत्वातिष्ठन्प्रत्यङ्मुखःप्राङ्मुख्याआसीनायागृभ्णामितेसौभग
त्वायहस्तमित्यंगुष्ठमेवगृह्णीयाद्यदिकामयीतपुमांसएवमेपुत्राजायेर
न्नित्यंगुलीरेवास्त्रीकामोरोमांतेहस्तंसांगुष्ठमुभयकामःप्रदक्षिणमग्नि राम
मुदकुंभंचत्रिःपरिणयंजपत्यमोहमस्मिसात्वंसात्वमस्यमोहंद्यौ ४

Indira Gandhi National Centre for the Arts